**ब(ब्र)ह्मचर्य्य** न० ब्रह्मणे वेदग्रहणार्थं चर्य्यम्। द्विजानां वेदग्रहणार्थव्रतभेदे। “प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा। ग्रहणान्तिकमित्येके” गरुड़पु० ६४अ०। तत्प्रकारो मनुनोक्तो यथा

“कृतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्वकम्। यद् यस्य विहितञ्चर्म यत् सूत्रं या च मेखला। यो दण्डो यच्च वसनन्तत्तदस्य व्रतेष्वपि। सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्। सन्नियम्येन्द्रियग्राममन्तपोवृद्ध्यर्थमात्मनः। नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनञ्चैव समिदाधानमेव च। वर्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम्। अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्। द्यूतञ्च जनवादञ्च परिवादन्तथाऽनृतम्। स्त्रीणाञ्च प्रेक्षणालम्भमुपघातम्परस्य च। एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्। आहरेद्यावदर्थानि भैक्षञ्चाहरहश्चरेत्। वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु। ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्। गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत्। सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसम्भवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्। दूरादाहृत्य समिधः संनिदध्याद्विहायसि। सायम्प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः। अकृत्वा भैक्षचरणमसमिध्य च पावकम्। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद् व्रती। भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता। व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत्। काममभ्यर्थितोऽश्नीयाद् व्रतमस्य न लुप्यते। ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः। राजन्यवैश्ययोस्त्वेवं नैतत् कर्म विधीयते”। ततः गुरुवृत्तिरुक्ता सा च गुरुवृत्तिशब्दे २६२२ पृ० दर्शिता। २योगाङ्गयमभेदे च “अहिंसासत्याऽस्तेय ब(ब्र)ह्मचर्य्याऽपरिग्रहा यमाः” पात०। तत्र ब(ब्र)ह्मचर्य्यं व्याकृतं भाष्यविवरणाभ्यां यथा “ब(ब्र)ह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः” भा०। “संयतोपस्थोऽपि हि स्त्रीप्रेक्षणतदालापकन्दर्पायतनतदङ्गस्पर्शनसक्तो न ब(ब्र)ह्मचर्य्यवान् तन्निरासायोक्तं गुप्तेन्द्रियस्येति इन्द्रियान्तराण्यपि तत्र लोलुपानि रक्षणीयानि” विव०। तत्र अष्टाङ्गमैथुनशब्दे ५२४ पृ० दर्शितवाक्येन मैथुनस्य स्मरणाद्यष्टाङ्गतया तदुपयोगीन्द्रियाणि संयम्यानीत्यर्थः। तत्फलञ्च तत्रोक्तं यथा “ब(ब्र)ह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः” पात०। “यस्य लाभादप्रतिघान् गुणानुत्कर्षयति सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवति” भा०। “वीर्य्यं सामर्थ्यं यस्य लाभादप्रतिघान् गुणानणिमादीन् विनेयेषु शिष्येषु ज्ञानं योगतदङ्गविषयमाधातुं समर्थो भवति” विव०। तथाच अष्टाङ्गमैथुनवर्जनमेव ब(ब्र)चर्य्यं तच्च स्त्रीपुंसयोः साधारणं पुंसः स्त्रीस्मरणाद्यष्टाङ्गराहित्यस्येव स्त्रीणां पुंस्मरणादिशून्यत्वस्यापि तथात्वम् “अतएव ब(ब्र)ह्मचर्य्यं तदन्वारोहणं वा” विष्णुसू०। विधवानामपि ब(ब्र)ह्मचर्य्यं विहितम् “मृते भर्त्तरि साध्वी स्त्री ब(ब्र)चर्य्यव्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब(ब्र)ह्मचारिणः” मनुव्याख्यायां ब(ब्र)चर्य्ये व्यवस्थिता अकृतपुरुषान्तरमैथुना” कुल्लू०उक्तम्। भावे क्यप् ब्रह्मचर्य्या तत्रार्थे स्त्री।

**ब(ब्र)ह्मचारिन्** पु० ब(ब्र)ह्म वेदस्तद्ग्रहणार्थं चरति व्रतमेदम् चर+णिनि। १उपनयनानन्तरमाद्याश्रमयुते द्विजातौ उपचारात् २तदाश्रमे च। तस्य कर्त्तव्यादिकं मनूक्तं ब(ब्र)चर्य्यशब्दे दर्शितम्।

**ब(ब्र)ह्मचारिणी** स्त्री “वेदेषु चरते यस्मात् तेन सा ब्रह्मचारिणी” देवीपु०४५अ० निरुक्तियुक्तायां वेदमातृमन्यायां चिच्छक्तिरूपायां १दुर्गायां २ब्रह्मचर्य्ययुतायां स्त्रियाञ्च “आसीतामरणात् क्षान्ता नियता ब(ब्र)ह्मचारिणी” मनुः। ३वारुणीवृक्षे राजनि०। ४ब्राह्मीशाके रत्नमाला।

**ब(ब्र)ह्मज** पु० ब्रह्मणो जायते जन–ड। १हिरण्यगर्भे “यो वै ब(ब्र)ह्माणं विदधाति पूर्वं यश्चास्मै प्रहिणोति वेदम्” श्रुतेः “सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः” इत्युपक्रमे “तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयंब्रह्मा सर्वलोकपितामहः” इति मनूक्तेश्च तस्य तथात्वम्। २ब्रह्मजातमात्रे पञ्चभूतादौ च “यतो वा इमानि भूतानि जायन्ते” इत्युपक्रमे “तद् विजिज्ञासस्व ब्रह्मेति श्रुतौ ब्रह्मतः सर्वभूतोत्पत्तिश्रवणात्।